- त्वम् अग्ने -

- tvam agne -

त्वमग्ने रुद्रो असुरो महो दिवस्त्वग्ं शर्धो मारुतं वृक्ष ईशिषे। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना॥

tvamagne rudro asuro maho divastvagṁ śardho mārutaṁ vṛkṣa īśiṣe| tvaṁ vātairaruṇairyāsi śaṅgayastvaṁ pūṣā vidhataḥ pāsi nu tmanā||

आ वो राजनमध्वरस्य रुद्रग्ं होतारग्ं सत्ययजग्ं रोदस्योः। अग्निं पुरातनयित्नो रचित्ता द्दिरण्यरूप मनसे कृणुध्वं॥

ā vo rājanamadhvarasya rudragṁ hotāragṁ satyayajagṁ rodasyoḥ| agniṁ purātanayitno racittā ddiraṇyarūpa manase kṛṇudhvaṁ||

अग्निर्होत नि ष सादा यजीयानुपस्थे मातुः सुरभावु लोके। युवा कविः पुरुनिष्ठः॥ ऋतावा धर्ता कृष्टीनामुत मध्य इद्धहः॥

agnirhota ni ṣa sādā yajīyānupasthe mātuḥ surabhāvu loke| yuvā kaviḥ puruniṣṭhaḥ|| ṛtāvā dhartā kṛṣṭīnāmuta madhya iddhhaḥ||

साध्वीमकर्देववीतिं नो अद्य यज्ञस्य जिह्वामविदाम गुह्यां। स आयु राऽगा त्सुरभि र्वसानो भद्रामकर्देवहूतिं नो अद्य॥

sādhvīmakardevavītiṁ no adya yajñasya jihvāmavidāma guhyāṁ| sa āyu rā'gā tsurabhi rvasāno bhadrāmakardevahūtiṁ no adya||

अक्रन्ददग्निः स्तनयन्निव द्यौः क्षामा रेरिहद्वीरुधः समञ्जन्न्। सद्यो जज्ञानो वि ही मिद्धो अख्य दा रोदसी भनुना भात्यन्तः॥

akrandadagniḥ stanayanniva dyauḥ kṣāmā rerihadvīrudhaḥ samajñann| sadyo jajñāno vi hī middho akhya dā rodasī bhanunā bhātyantaḥ||

त्वे वसूनि पुर्वणीक होतर्दोषा वस्तो रेरिरे यज्ञियासः। क्षामेव विश्वा भुवनानि यस्मि न्थ्सग्ं सौभगानि दधिरे पावके॥

tve vasūni purvaṇīka hotardoṣā vasto rerire yajñiyāsaḥ| kṣāmeva viśvā bhuvanāni yasmi nthsagṁ saubhagāni dadhire pāvake||

तुभ्यं ता अङ्गिरस्तम विश्वाः सुक्षितयः पृथक्। अग्ने कामाय येमिरे॥

tubhyaṁ tā ajñgirastama viśvāḥ sukṣitayaḥ pṛthak| agne kāmāya yemire||

अश्याम तम् काममऽग्ने तवो त्यश्याम रयिगं रयिवः सुवीरम्। अश्याम वाजमभि वाजयन्तोऽश्याम द्युम्नमजराजरं ते॥

aśyāma tam kāmama'gne tavo tyaśyāma rayigṁ rayivaḥ suvīram| aśyāma vājamabhi vājayanto'śyāma dyumnamajarājaraṁ te||

श्रेष्ठं यविष्ठ भारताऽग्ने द्युमन्तमा भर। वसो पुरुस्पृहगं रयिं॥

śreṣṭhaṁ yaviṣṭha bhāratā'gne dyumantamā bhara| vaso puruspṛhagṁ rayiṁ||

स श्वितान स्तन्यतू रोचनस्था अजरेभि र्नानदद्भिर्यविष्ठः। यः पावकः पुरुतमः पुरूणि पृथून्यग्नि रनुयाति भर्वन्न्॥

sa śvitāna stanyatū rocanasthā ajarebhi rnānadadbhiryaviṣṭhaḥ| yaḥ pāvakaḥ purutamaḥ purūṇi pṛthūnyagni ranuyāti bharvann||

आयुष्टे विश्वतो दधदयमग्निर् वरेण्यः। पुनस्ते प्राण आऽयति परा यक्ष्मगं सुवामि ते॥

āyuṣte viśvato dadhadayamagnir vareṇyaḥ| punaste prāṇa ā'yati parā yakṣmagṁ suvāmi te||

आयुर्दा अग्ने हविषो जुशाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभि रक्षतादिमम्॥

āyurdā agne haviṣo juśāṇo ghṛtapratīko ghṛtayoniredhi| ghṛtaṁ pītvā madhu cāru gavyaṁ piteva putramabhi rakṣatādimam||

तस्मै ते प्रतिहर्यते जातवेदो विचर्षणे। अग्ने जनामि सुष्टुतिम्॥

tasmai te pratiharyate jātavedo vicarṣaṇe| agne janāmi suṣṭutim||

दिवस्परि प्रथमं जज्ञे अग्निरस्म द्द्वितीयं परि जातवेदाः। तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः॥

divaspari prathamaṁ jajñe agnirasma ddvitīyaṁ pari jātavedāḥ| tṛtīyamapsu nṛmaṇā ajasramindhāna enaṁ jarate svādhīḥ||

शुचिः पावक वन्द्योऽग्ने बृहद्वि रोचसे। त्वं घृतेभिराहुतः॥

śuciḥ pāvaka vandyo'gne bṛhadvi rocase| tvaṁ ghṛtebhirāhutaḥ||

दृशानो रुक्म उर्व्या व्यद्यौ द्दुर्मर्ष मायुः श्रिये रुचानः। अग्निरमृतो अभवद्वयोभिः॥ यदेनं द्यौरजनयथ्सुरेताः॥

dṛśāno rukma urvyā vyadyau ddurmarṣa māyuḥ śriye rucānaḥ| agniramṛto abhavadvyayobhiḥ|| yadenaṁ dyaurajanayathsuretāḥ||

आयदिषे नृपतिं तेज आनट्चुचि रेतो निषिक्तं द्यौरभीके। अग्निः शर्धमनवद्यं युवानग्ं स्वाधियं जनयत्सूदयच्च ॥

āyadiṣe nṛpatiṁ teja ānaṭcuci reto niṣiktaṁ dyaurabhīke| agniḥ śardhamanavadyaṁ yuvānaggṁ svādhiyaṁ janayatsūdayacca||

सतेजीयसा मनसा त्वोत उत शिक्ष स्वपत्यस्य शिक्षोः। अग्ने रायो नृतमस्य प्रभूतौ भूयाम ते सुष्टुतयश्च वस्वः ॥

satejīyasā manasā tvota uta śikṣa svapatyasya śikṣoḥ| agne rāyo nṛtamasya prabhūtau bhūyāma te suṣṭutayaśca vasvaḥ||

अग्ने सहन्तमा भर द्युम्नस्य प्रासहा रयिम्। विश्व य श्चर्षणीरभ्यासा वाजेषु सासहत्॥

agne sahantamā bhara dyumnasya prāsahā rayim| viśva ya ścarṣaṇīrabhyāsā vājeṣu sāsahat||

तमऽग्ने पृतनासहग्ं रयिगं सहस्व आ भर। त्वग्ं हि सत्यो अद्भुतो दाता वाजस्य गोमतः॥

tama'gne pṛtanāsahagṁ rayigṁ sahasva ā bhara| tvagṁ hi satyo adbhuto dātā vājasya gomataḥ||

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे। स्तोमैर्विधेमाऽग्नये॥

ukṣānnāya vaśānnāya somapṛṣṭhāya vedhase| stomairvidhemā'gnaye||

वद्मा हि सूनो अस्यद्मसद्वा चक्रे अग्निर्जनुषाऽज्मा। स त्वं न ऊर्जसन ऊर्जं धा राजेव जेरवृके क्षेष्यन्तः॥

vadmā hi sūno asyadmasadvā cakre agnirjanuṣā'jmā| sa tvaṁ na ūrjasana ūrjaṁ dhā rājeva jeravṛke kṣeṣyantaḥ||

अग्न आयुग्ंषि॥ पवस आ सुवोर्जमिषं च नः। आरे बाधस्व दुच्छुनाम्॥

agna āyugṁṣi|| pavasa ā suvorjamiṣaṁ ca naḥ| āre bādhasva duccunām||

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दध त्पोषग्ं रयिं मयि॥

agne pavasva svapā asme varcaḥ suvīryam| dadha tpoṣagṁ rayiṁ mayi||

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया। आ देवन् वक्षि यक्षि च॥

agne pāvaka rociṣā mandrayā deva jihvayā| ā devan vakṣi yakṣi ca||

स नः पावक दीदिवोऽग्ने देवाग्ं इहाऽऽवह। उप यज्ञग्ं हविश्च नः॥

sa naḥ pāvaka dīdivo'gne devāgm ihā''vaha| upa yajñagṁ haviśca naḥ||

अग्निः शुचिव्रततमः शुचि र्विप्रः शुचिः कविः। शुची रोचत आहुतः॥

agniḥ śucivratatamaḥ śuci rvipraḥ śuciḥ kaviḥ| śucī rocata āhutaḥ||

उदग्ने शुचय स्तव शुक्रा भ्राजन्त ईरते। तव ज्योतीग्ंष्यर्चयः॥

udagne śucaya stava śukrā bhrājanta īrate| tava jyotīggṁṣyarcayaḥ||

त्वमग्ने रुद्रो असुरो महो दिवस्त्वग्ं शर्धो मारुतं वृक्ष ईशिषे। त्वं वातैररुणैर्यासि शंगयस्त्वं पूषा विधतः पासि नु त्मना॥

tvamagne rudro asuro maho divastvagṁ śardho mārutaṁ vṛkṣa īśiṣe| tvaṁ vātairaruṇairyāsi śaṅgayastvaṁ pūṣā vidhataḥ pāsi nu tmanā||

देवा देवेषु श्रयध्वं। प्रथमा द्वितीयेषु श्रयध्वं। द्वितीया स्तृतीयेषु श्रयध्वं। तृतीया श्चतुर्धेषु श्रयध्वं। चतुर्धा पंचमेषु श्रयध्वं। पंचमा ष्षष्ठेषु श्रयध्वं। षष्ठाः सप्तमेषु श्रयध्वं। सप्तमा अष्टमेषु श्रयध्वं। अष्तमा नवमेषु श्रयध्वं। नवमा दशमेषु श्रयध्वं। दशमा एकादशेषु श्रयध्वं। एकादशा द्वादशेषु श्रयध्वं। द्वादशास्त्रयोदशेषु श्रयध्वं। त्रयोदशा श्चतुर्दशेषु श्रयध्वं। चतुर्दशाः पंचदशेषु श्रयध्वं। पंचदशाः षोडशेषु श्रयध्वं। षोडशाः सप्तदशेषु श्रयध्वं। सप्तदशा अष्टादशेषु श्रयध्वं। अष्टादशा एकान्नविग्ंशेषु श्रयध्वं। एकान्नविग्ंशा विग्ंशेषु श्रयध्वं। विग्ंशा एकविग्ंशेषु श्रयध्वं। एकविग्ंशा द्वविग्ंशेषु श्रयध्वं। द्वाविग्ंशास्त्रयोविग्ंशेषु श्रयध्वं। त्रयोविग्ंशा श्चतुर्विग्ंशेषु श्रयध्वं। चतुर्विग्ंशाः पंचविग्ंशेषु श्रयध्वं। पंचविग्ंशाः षड्विग्ंशेषु श्रयध्वं। षड्विग्ंशाः सप्तविग्ंशेषु श्रयध्वं। सप्तविग्ंशा अष्टाविग्ंशेषु श्रयध्वं। अष्ताविग्ंशा एकान्नत्रिग्ंशेषु श्रयध्वं। एकान्नत्रिग्ंशा स्त्रिग्ंशेषु श्रयध्वं। त्र्ग्ंशा एकत्रिग्ंशेषु श्रयध्वं। एकत्रिग्ंशा द्वात्रिग्ंशेषु श्रयध्वं। द्वात्रिग्ंशा स्त्रयस्त्रिग्ंशेषु श्रयध्वं। देवा स्त्रिरेकादशा स्त्रिस्त्रय स्त्रिग्ंशाः। उत्तरेभवत। उत्तरवर्त्मान उत्तरसत्वानः। यत्काम इदं जुहोमि। तन्मे समृध्य्यताम्। वयग्ग् स्याम पतयो रयीणां। भूर्भुवः स्स्वः स्स्वाहा॥

devā deveṣu śrayadhvaṁ| prathamā dvitīyeṣu śrayadhvaṁ| dvitīyā stṛtīyeṣu śrayadhvaṁ| tṛtīyā ścaturdheṣu śrayadhvaṁ| caturdhā pañcameṣu śrayadhvaṁ| pañcamā ṣṣaṣṭheṣu śrayadhvaṁ| ṣaṣṭhāḥ saptameṣu śrayadhvaṁ| saptamā aṣṭameṣu śrayadhvaṁ| aṣṭamā navameṣu śrayadhvaṁ| navamā daśameṣu śrayadhvaṁ| daśamā ekādaśeṣu śrayadhvaṁ| ekādaśā dvādaśeṣu śrayadhvaṁ| dvādaśāstrayodaśeṣu śrayadhvaṁ| trayodaśā ścaturdaśeṣu śrayadhvaṁ| caturdaśāḥ pañcadaśeṣu śrayadhvaṁ| pañcadaśāḥ ṣoḍaśeṣu śrayadhvaṁ| ṣoḍaśāḥ saptadaśeṣu śrayadhvaṁ| saptadaśā aṣṭādaśeṣu śrayadhvaṁ| aṣṭādaśā ekānnavigṁśeṣu śrayadhvaṁ| ekānnavigṁśā vigṁśeṣu śrayadhvaṁ| vigṁśā ekavigṁśeṣu śrayadhvaṁ| ekavigṁśā dvavigṁśeṣu śrayadhvaṁ| dvāvigṁśāstrayovigṁśeṣu śrayadhvaṁ| trayovigṁśā ścaturvigṁśeṣu śrayadhvaṁ| caturvigṁśāḥ pañcavigṁśeṣu śrayadhvaṁ| pañcavigṁśāḥ ṣaḍvigṁśeṣu śrayadhvaṁ| ṣaḍvigṁśāḥ saptavigṁśeṣu śrayadhvaṁ| saptavigṁśā aṣṭāvigṁśeṣu śrayadhvaṁ| aṣṭāvigṁśā ekānnatrigṁśeṣu śrayadhvaṁ| ekānnatrigṁśā strigṁśeṣu śrayadhvaṁ| trgṁśā ekatrigṁśeṣu śrayadhvaṁ| ekatrigṁśā dvātrigṁśeṣu śrayadhvaṁ| dvātrigṁśā strayastrigṁśeṣu śrayadhvaṁ| devā strirekādaśā stristraya strigṁśāḥ| uttarebhavata| uttaravartmāna uttarasatvānaḥ| yatkāma idaṁ juhomi|

tanme samṛdhdhyatām। vayagg syāma patayo rayīṇāṁ। bhūrbhuvaḥ ssvaḥ ssvāhā।।

ॐ नमो भगवते रुद्राय ॥ त्वमग्ने त्वमग्ने शतरुद्रीय मित्यस्त्राय फट् ॥ भूर्भुवस्सुवरोमिति दिग्बंधः ॥

om namo bhagavate rudrāya।। tvamagne tvamagne śatarudrīya mityastrāya phaṭ।। bhūrbhuvassuvaromiti digbandhaḥ।।

अथ पंचांगगं सकृज्जपेत् ॥

atha pañcāṅgagṁ sakṛjjapet।।

सद्योजातं प्रपद्यामि सद्योजातायवै नमो नमः। भवेभवेनाति भवे भवस्वमां। भवोद्भवाय नमः।

sadyojātaṁ prapadyāmi sadyojātāyavai namo namaḥ। bhavebhavenāti bhave bhavasvamāṁ। bhavodbhavāya namaḥ।

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमः सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

vāmadevāya namo jyeṣṭhāya namaḥ śreṣṭhāya namo rudrāya namaḥ kālāya namaḥ kalavikaraṇāya namo balavikaraṇāya namo balāya namo balapramathanāya namaḥ sarvabhūtadamanāya namo manonmanāya namaḥ।।

अघोरेभ्यो अथघोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वश-र्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

aghorebhyo (a)thaghorebhyo ghoraghoratarebhyaḥ। sarvebhya-ssarvaśa-rvebhyo namaste astu rudrarūpebhyaḥ।।

तत्पुरुषाय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात् ॥

tatpuruṣāya vidmahe mahādevāya dhīmahi। tanno rudraḥ pracodayāt।।

ईशानः-सर्व-विद्याना-मीश्वर-स्सर्व-भूतानां ब्रह्मा-धिपति-र्ब्रह्मणो-धिपति-र्ब्रह्मा शिवो मे अस्तु सदाशिवोँ ॥

īśānaḥ-sarva-vidyānā-mīśvara-ssarva-bhūtānāṁ brahmā-dhipati-rbrahmaṇo-dhipati-rbrahmā śivo me astu sadāśivoṁ।।